**संस्कृतवार्ता:**

**दिनाङ्क: - 26.11.2024**

**सायम् - 06:20**

**मुख्यवार्ताः**

- **समग्र-राष्ट्रम् अद्य संविधानदिवसम् आमानयति। अङ्गीकृतस्य संविधानस्य अद्य पञ्चसप्ततितमः वार्षिक-दिवसो वर्तते। प्रधानमन्त्री सर्वोच्च-न्यायालये आयोजितम् संविधान-दिवस-समारोहं सम्बोधितवान्।**
- **राष्ट्रपतिः द्रौपदी-मुर्मुः संसदः उभे सदने सम्बोधयन्ती नागरिकैः आग्रहम् कृतवती यत्ते सांवैधानिक-आदर्शानाम् अनुपालनं कुर्युः इति।**
- **केन्द्रप्रशासनेन पञ्चदश-राज्येभ्यः आपत्शमनाय क्षमता-निर्माण-परियोजनाभ्यः च पञ्चदशाधिक-एकशतोत्तर-एक-सहस्र-कोटि-रूप्यकाणि अनुमोदितानि।**
- **राष्ट्रपतिः द्रौपदीमुर्मः मुम्बईनगर्यां अष्टाधिक-द्विसहस्रतमे वर्षे नवम्बरमासे षड्विंशे दिनाङ्के जाते आतङ्की-आक्रमणे हुतिंगतेभ्यः वीरभटेभ्यः श्रद्धाञ्जलिम् समर्पितवती। कथितवती यत् भारतम् आतंकवादस्य शमनाय प्रतिबद्धम् अस्ति इति।**
- **देशेन अद्य राष्ट्रिय-दुग्ध-दिवसः आमान्यते। डॉ वर्गीस-कुरियन-इत्यस्य अद्य त्र्यधिक-एक शततमी जयन्ती अस्ति यो हि भारते श्वेतक्रान्तेः जनकः कथ्यते।**

संविधान दिवसः

अङ्गीकृतस्य संविधानस्य अद्य पञ्चसप्ततितमः वार्षिकसम्पूर्तिदिवसो वर्तते। प्रशासनेन अत्रावसरे अद्यारभ्य एकवर्षपर्यन्तं प्रचल्यमानस्य समारोहस्य प्रारम्भः कृतः। अयं समारोहः समग्रदेशे आयोज्यते। अवधेयं वर्तते यत् संविधानसभया नवचत्वारिंशदधिक-नवदश-शततमे वर्षे नवम्बरमासस्य षड्विंशे दिनाङ्के संविधानं अङ्गीकृतम् तत्पश्चात् पञ्चाशदधिक-नवदश-शततमे वर्षे जनवरीमासस्य षड्विंशे दिनाङ्के क्रियान्वितं जातम्। अत्रावसरे राष्ट्रपतिः द्रौपदीमुर्मुः संविधान-सदनस्य केन्द्रीयकक्षे आयोजितं एकं भव्यं कार्यक्रमं सम्बोधितवती यत् भारतीय-संविधानं एकं जीवितं प्रगतिशीलं च ग्रन्थरत्नं वर्तते। यस्य माध्यमेन भारतदेशेन सामाजिकन्याय-समावेशि-विकासयोः लक्ष्याः प्राप्ताः। एतदनन्तरं राष्ट्रपतिः जनैः आग्रहं कृतवती यत्ते सांवैधानिक-आदर्शानाम् अनुपालनं कुर्युः इति।

राष्ट्रपतिः अग्रे अवदत् यत् भारतीय-संविधानस्य प्रस्तावनायां न्याय-स्वतन्त्रता-समानता-बन्धुत्वानाम् आदर्शाः समङ्किताः। स्वकीये सम्बोधने राष्ट्रपतिः पञ्चदश महिला-सदस्यानां योगदानमपि स्मृतवती। एतासां महिलानां संविधानसभायां महत्वपूर्ण-भूमिकाः आसन्।

तदनु उपराष्ट्रपतिः जगदीपधनखडः प्रोक्तवान् यत् अयं संविधानस्य पञ्चसप्ततितमः दिवसः भविष्याय बृहत्तमं सोपानं वर्तते। इयं विश्वस्य बृहत्तमाय गतिशीलाय लोकतन्त्राय महत्वपूर्णा उपलब्धिः विद्यते। अत्रान्तरे लोकसभा-अध्यक्षः ओम् बिरलाः निजसम्बोधने अकथयत् यत् भारतीयसंविधानं देशस्य नागरिकाणां वर्षाणां तपसः योगदानस्य प्रतिभायाः शक्तेः च परिणामं विद्यते।

कार्यक्रमस्य वेलायां राष्ट्रपतिः एकस्याः स्मारक-मुद्रायाः एकस्याः प्रैष्य-चिटिकायाः च अनावरणं कृतवती। अस्मिन् संविधान-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयमन्त्रिणः विपक्ष-दलस्य नेतारः अन्ये च जनाः सम्मिलिताः अभवन्। प्रधानमन्त्री अस्मिन् अवसरे समेभ्यः नागरिकेभ्यः शुभकामनाः प्रदत्तवान्। उक्तवान् च यत्

संविधानं राष्ट्रस्य मार्गदर्शकत्वेन अस्ति। तत्रैव नवदिल्ल्यां सर्वोच्च-न्यायालये आयोजिते समारोहे भारतस्य मुख्यन्यायाधीशः सञ्जीवखन्नाः समारोहं सम्बोधितवान्। अवधेयं वर्तते यत् अद्य संविधान-दिवसस्य पञ्चसप्ततितमे वर्ष-अवसरे राष्ट्रपतिः द्रौपदीमुर्मुः संस्कृतभाषायां अनूदितां संविधानप्रतिं विमोचितवती।

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

<u>मुम्बई-आक्रमणम्</u>

राष्ट्रपतिः द्रौपदीमुर्मः मुम्बईनगर्यां अष्टाधिक-द्विसहस्रतमे वर्षे नवम्बरमासे षड्विंशे जाते आतङ्की-आक्रमणे हुतिंगतेभ्यः वीरभरेभ्यः श्रद्धाञ्जलिम् समर्पितवती। राष्ट्रपतिः एकस्मिन् सामाजिक-सन्देशपटले उक्तवती यत् राष्ट्रं तेभ्यः समग्रेभ्यः सुरक्षाकर्मिभ्यः नमनं समर्पयति। ये देशवासिनां रक्षणार्थं निजप्राणान् अत्यजन्। अग्रे कथितवती यत् भारतम् आतंकवादस्य शमनाय प्रतिबद्धम् अस्ति इति। तत्रैव मुम्बई-नगर्यां महाराष्ट्रस्य राज्यपालः सी.पी. राधाकृष्णन-इत्येषः मुख्यमन्त्री एकनाथशिंदेः उपमुख्यमन्त्रिणौ देवेन्द्रफणनवीसः अजीत पवारः च अद्य मुम्बई-आतङ्की-आक्रमणस्य षोडशतमे वर्षे वीरसैनिकेभ्यःश्रद्धाञ्जलिं समर्पितवन्तः। अस्मिन् एव दिवसे पाकिस्ताना-धारितेन लश्कर-ए-तैय्याबा-इत्यनेन दशयुतेन आङ्की-समूहेन आक्रमणं कृतम् यस्मिन् षड्षष्ट्यधिकैकशतं जनाः दिवङ्गताः त्रिंशत् जनाश्च व्रणिताः अभवन्।

<u>राष्ट्रियदुग्धदिवसः</u>

देशेन अद्य राष्ट्रिय-दुग्ध-दिवसः आमान्यते। डॉ वर्गीस-कुरियन-इत्यस्य अद्य त्र्यधिक-एक शततमी जयन्ती अस्ति यो हि भारते श्वेतक्रान्ते : जनकः कथ्यते।

अत्रावसरे नवदिल्ल्यां मत्स्यपालन-पशुपालन-दुग्धोत्पादन-मन्त्रालयः एकं समारोहं आयोजितम्। एतस्मिन् समारोहे केन्द्रीय-मत्स्य-पशुपालन-मन्त्री-राजीव-रञ्जनसिंहः भागं स्वीकृतवान्।

<u>प्रशासनं-स्वीकृतिः</u>

केन्द्रप्रशासनेन पञ्चदश राज्येभ्यः आपत्शमनाय क्षमतानिर्माण-परियोजनाभ्यः च पञ्चदशाधिक-एकशतोत्तर-एक-सहस्र-कोटि-रूप्यकाणि अनुमोदितानि। केन्द्रीयगृहमिन्त्रणाः अमितशाहस्य अध्यक्षतायां एकया उच्चस्तरीय-समित्या अस्मै कोषाय स्वीकृतिः प्रदत्ता। एषा समितिः अष्टेभ्यः पूर्वोत्तर-राज्येभ्यः अष्ट-सप्तत्यधिक-त्रिशत-कोटि-रूप्यकाणि उत्तराखण्ड-हिमाचलप्रदेशाभ्यां नवत्रिंशदधिकैकशत-कोटिरूप्यकाणि महाराष्ट्राय-केरलाभ्यां भूयोऽपि सप्ततिकोटि-रूप्यकाणि तमिलनाडु-पश्चिमबङ्गालभ्यां पञ्चशत्-कोटि-रूप्यकाणि आवण्टितानि।

इति वार्ताः।।